International Journal of Applied Research 2022; 8(2): 569-573




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2022; 8(2): 569-573
www.allresearchjournal.com
Received: 15-12-2021
Accepted: 20-01-2022

**अशोकमण्डलः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी,
ओडिशा, भारत

**Corresponding Author:**
**अशोकमण्डलः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी,
ओडिशा, भारत

# शिवराजविजये प्रकृतिचित्रणम्

**अशोकमण्डलः**

**सारांश**
संस्कृतसाहित्यपरम्परायां प्रकृतिचित्रणं काव्यस्य अपरिहार्याङ्गत्वेन आलङ्कारिकाचार्यैः स्वीकृतम्। यथा प्राचीनसंस्कृतसाहित्ये व्यास-वाल्मीकि-कालिदास-भास-भारवि-भट्टि-माघ-दण्डि-बाणादिकविभिः तेषां स्व स्व रचनायां प्रकृतेः मनोहरं वर्णनं समुद्भासितम्; तथैव आधुनिकसंस्कृतसाहित्ये 'आधुनिकबाणः' इत्युपाधिना समलङ्कृतेन श्रीमता अम्बिकादत्तव्यासेनापि 'शिवराजविजयः' इत्युपन्यासात्मके गद्यकाव्ये प्रकृतेः सुकुमारतररूपस्य मनोहरतया वर्णनं समुपस्थापितम्। यतोहि यस्मिन् काव्ये प्रकृतिचित्रणं यावता परिमाणेन सजीवायते, तत्काव्यं तावता परिमाणेन सहृदयैर्हार्दं सेव्यते। ग्रन्थे प्रकृतेः अङ्गभूतानां सूर्य-चन्द्र-प्रभात-रात्रि-आश्रम-सरोवर-उद्यान-अटवी-ऋत्वादीनां विषये विविधरसैरलङ्कारैर्गुणै रीतिभिश्च यद् वर्णनं कविना विहितम्, तदस्मिन् शोधपत्रे संक्षेपेणालोचितमस्ति।

**कूटशब्दः** सूर्यवर्णनम्, सूर्यास्तवर्णनम्, प्रभातवर्णनम्, रात्रिवर्णनम्, चन्द्रोदयवर्णनम्, आश्रमप्रकृतिवर्णनम्, पूर्ववङ्गप्रकृतिवर्णनम्, सरोवरवर्णनम्, उद्यानवर्णनम्, अटवीवर्णनम्, झञ्झावातवर्णनम्, आषाढवर्णनम्, शरदृतुवर्णनम्, शीतर्तुवर्णनम्।

## प्रस्तावनाः

सृष्टेरादिकालत एव प्रकृतिमानवयोरविच्छिन्नः सम्बन्धो वर्तते, अतो भारतीयचिन्तनपरम्परायां प्रकृतिमानवयोः अभेदारोपकृतवर्णनमनुभूयते। प्रकृतौ शक्तिश्च वर्तते। पुनरपि तस्याः क्षमामयता, गम्भीरता, उदारता, आह्लादकता चेत्यादिविशेषताः सर्वसहृदयानुभवाः स्वतः सिद्धाश्च। प्रकृतिः सदा सर्वदा मानवान् प्रेरयति, तदीयशरीरे विविधां शक्तिञ्च सञ्चारयति। मानवस्य कृते सा प्रथमा शिक्षादात्री एव। यदि मानवः प्रकृतेः सन्देशमुद्बोधपूर्णरहस्यञ्च प्राप्नोति, तर्हि स कयाऽपि रमणीयसत्तया सह सम्पृक्तो भूत्वा चिरानन्दमयजीवनं यापयितुं समर्थो भवति। अतः संस्कृतसाहित्यपरम्परायां प्रकृतिचित्रणं काव्यस्य आवश्यकाङ्गत्वेन आलङ्कारिकाचार्यैः[1] स्वीकृतम्। यथा प्राचीनसंस्कृतसाहित्ये व्यास-वाल्मीकि-कालिदास-भास-भारवि-माघ-दण्डि-बाणादिकविभिः तेषां स्व स्व रचनायां प्रकृतेः रम्यं चित्रणं समुद्भासितम्; तथैव श्रीमता अम्बिकादत्तव्यासेन 'शिवराजविजयः' इत्युपन्यासात्मके गद्यकाव्ये प्रकृतेः सुकुमारतररूपस्य मनोहरतया वर्णनं संस्थापितम्। यतोहि यस्मिन् काव्ये प्रकृतिचित्रणं यावता परिमाणेन सजीवायते, तत् काव्यं तावता परिमाणेन सहृदयैर्हार्दं सेव्यते। अनया दृष्ट्या शिवराजविजये प्रकृतिचित्रणं कविना यद् विहितं तदत्र संक्षेपेण आलोच्यते।

[1]"सन्ध्या-सूर्येन्दु-रजनी-प्रदोष-ध्वान्त-वासराः।
प्रातर्मध्याह्न-मृगया-शैलर्तु-वन-सागराः॥" साहित्यदर्पणः ६/३२२, सम्पा. शास्त्री, आचार्यकृष्णमोहनः, चौखम्भसंस्कृतसंस्थानम्, वाराणसी २०१८.

**सूर्यवर्णनम्**— ग्रन्थस्यास्यादौ प्रथमे निःश्वासे सूर्योदयस्य वर्णनाप्रसङ्गे प्रकृतेः मूलभूतस्वरूपस्य सूर्यस्य रमणीयं वर्णनमुपमारूपकादिरलङ्कारैः समुपस्थापितं श्रीमदम्बिकादत्तव्यासेन। तद्यथा—

"अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एतेनैव सम्पादिता युगभेदाः, एतेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्द्धसङ्ख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते।"[2]

एवं कविना ग्रन्थस्य अन्तिमे अर्थात् द्वादशे निःश्वासेऽपि सूर्योदयस्य वर्णनं संस्थापितम्। अरुणोदयवर्णनेनैव ग्रन्थस्यारभ्य तेनैव समापयन्, उपक्रमोपसंहारयोरैक्यं दर्शयति ग्रन्थकारोऽम्बिकादत्तः। तद्यथा—

"जातोऽयमरुणोदयः, कलविङ्कैरारब्धः कलरवः, तनूभूतं तमः, धीरः समीरः, इरंमदो मदयति मयूरान्, मतङ्गमोहनं गन्धमुद्गिरति नव-वारिद-वारि-सरसिता रसा, बलाहका मन्दं गर्ज्जन्ति।"[3]

**सूर्यास्तवर्णनम्**— एवं कविना अनुप्रास-उत्प्रेक्षा-स्वभावोक्त्यादिरलङ्कारैः सूर्यास्तस्याऽपि सुमधुरं वर्णनं कृतं, यत्र कवेः विलक्षणकल्पनाशक्तेः चमत्कारं निदर्शनं प्राप्यते। यथा—

"अथ जगतः प्रभाजालमाकृष्य, कमलानि सम्मुद्र्य, कोकान् सशोकीकृत्य, सकलचराचर-चक्षुःसञ्चार-शक्तिं शिथिलीकृत्य, कुण्डलेनेव निजमण्डलेन पश्चिमामाशां भूषयन्, वारुणीसेवनेनैव माञ्जिष्ठ-मञ्जिम-रञ्जितः अनवरत-भ्रमण-परिश्रम-श्रान्त इव सुषुप्सुः, ....चिन्ताक्रान्त इव कन्दरि-कन्दरेषु प्रविविक्षुर्भगवान् भास्वान्, क्रमशः क्रूरकरानपहाय, दृश्यपरिपूर्णमण्डलः संवृत्य, श्वेतीभूय, पीतीभूय रक्तीभूय च गगन-धरातलाभ्यामुभयत आक्रम्यमाण इवाण्डाकृतिमङ्गीकृत्य, ....अन्धतमसे च जगत् पातयन्, चक्षुषामगोचर एव सञ्जातः।"[4]

**प्रभातवर्णनम्**— एवं कविना ग्रन्थस्य तृतीये निःश्वासे स्वभावोक्त्यलङ्कारेण प्रसादगुणेन वैदर्भीरीतिना च प्रभातकालस्य मनोरमं वर्णनं संस्थापितम्, तद्यथा—

"...अस्मिन्नपि समये शर्वरीतमांसि नाम्बरं साकल्येन जहति। स्वच्छापि प्राची नाधुनाऽप्यरुणिमानमङ्गीकरोति। विराव-बहुलान्यपि वयांसि न सम्प्रत्यपि विहाय नीडाधिष्ठान-कुटानुड्डीयन्ते। गिरि-ग्रामटिका-गृहेभ्यो व्यावर्त्तमाना अपि विटपिनो, न स्वफल-पुष्प-पत्राकार-परिचय-प्रदानैर्जातीः प्रकटयन्ति। उत्तरोत्तरतस्तारतारतरै रुतैरतार्त्तिमीरयन्त्यपि तरुणतित्तिरी न तरोरवतरति। आलोकालोककृत-किञ्चिच्छोकमोकोऽपि च कोको न वराकीं कोकीमुपसर्पति।"[5]

**रात्रिवर्णनम्**— प्रकृतेर्नैसर्गिकसुषमा स्वाभाविकमानन्दं रसमुद्भावयति। यथा ग्रन्थस्य प्रथमे निःश्वासे प्रकृतिचित्रणे शान्तरसेन वैदर्भीरीतिप्रयोगेन च शान्त-स्निग्ध-नीरव-निशायाः वर्णनं हृदयावर्जकं करोति पाठकानाम्। तद्यथा—

".... धीर-समीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी-कामिनी-चन्दनविन्दौ इव इन्दौ, कौमुदी-कपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्ता शुश्रूषुषु इव मौनमाकलयत्सु पतग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु..."[6] इत्यादि।

एवं कविना विहितं स्वभावोक्त्यादिरलङ्कारैः वाक्यविन्यासैः प्रकृतेः इतोऽपि एकं सुरम्यवर्णनं समुपलभ्यते ग्रन्थस्य तृतीये निःश्वासे वनरात्रिवर्णने। यथा—

"ततश्च झिल्लीझङ्कारेणेव केनचिद् विलक्षणेन अनाहतध्वनिनेव पर्य्यपूर्यत वसुधा। विचित्र एष कश्चन परस्सहस्रतानपूर-षड्ज-स्वर-सोदरो वनरात्रिध्वनिः, तमेव स्वरं गम्भीरं विशकलय्य आकर्णयता समश्रावि कीचकध्वनिरपि। तथाप्यवदधता साक्षादकारि मधुकर-निकर-झङ्कारः। पुनरेकाग्रकामङ्गीकुर्वता समाकर्णि स्रोतस्संसरण-सरत्कारः। तस्मिन्नपि च लयमिवाकलयता समन्वभावि समीरण-समीरित-किशलय-पारिप्लवता-प्रभूत-स्वनः, तत्रापि च स्थिरतां बिभ्रता प्रत्यक्षीकृतं सुधाधारामप्यधरीकुर्वत्, वीणारणनमपि विगणयत्, मधु विधुरयत्, मरन्दं मन्दयत्, कल-काकली-कलन-पूजितं कोकिल-कुल-कूजितम्। ततश्च बहूनामेव मधुरकण्ठानां वन्यपतत्रिणां स्थगित-मन्थरारावाः समाकर्णिषत। अथानुभवन् धीर-समीर-स्पर्श-सुखम्, साम्रेडमवलोयंश्च तारकितं नभः..."[7] इत्यादि।

---

[2]शिवराजविजयः( शि.वि.), निःश्वासः १/ पृष्ठसंख्या ३-४। अत्र सम्पूर्णेऽपि निबन्धे उपन्यासस्यास्य श्रीकेदारनाथशर्मणा काशीस्थेन व्यासप्रकाशनेन १९३८ तमे वर्षे प्रकाशितं संस्करणमुपयुज्यते।

[3]शि.वि. १२/३७७

[4] शि.वि. २/२८-२९

[5] शि.वि. ३/८२

[6] शि.वि. १/८

[7] शि.वि. ३/७५

**चन्द्रोदयवर्णनम्**— एवं कविना ग्रन्थस्य तृतीये निःश्वासे उत्प्रेक्षालङ्कारसमन्वितैर्वाक्यविन्यासैः चन्द्रोदयस्य वर्णना कृता। तद्यथा—

"ततश्च दुग्धधाराभिरिव प्रथमं प्राचीं संक्षाल्य, भसितच्छुरितामिव विधाय, चन्दनैरिव सञ्चर्च्य, कुन्द-कुसुमैरिवाकीर्य, गगन-सागर-मीने इव, मनोज-मनोज्ञ-हंसे इव, विरहि-निकृन्तन-रौप्य-कुन्त-प्रान्ते इव, पुण्डरीकाक्ष-पत्नी-कर-पुण्डरीकपत्रे इव, शारदाभ्रसारे इव, सप्तसप्ति-सप्ति-पादच्युते राजत-खुरत्रे इव, मनोहरता-महिला-ललाटे इव, कन्दर्पकीर्ति-लताङ्कुरे इव, प्रजा-जन-नयन-कर्पूरखण्डे इव, तमी-तिमिर-कर्त्तन-शाणोल्लीढ-निस्त्रिंशे इव च समुदिते चैत्र-चन्द्रखण्डे, तत्प्रकाशेन स्फुटं प्रतीयमानासु सर्वासु दिक्षु...."[8] इत्यादि।

**आश्रमप्रकृतिवर्णनम्**— शिवराजविजये कविना शब्दयोजनानुसारं गौडीरीतिप्रयोगपुरस्सरम् आश्रमप्रकृतेः रमणीयतायाः मनोरमं वर्णनमपि समुपस्थापितं, तद्यथा—

"कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परस्सहस्त्रपुण्डरीक-पटल-परिलसितं पतत्रि-कुल-कूजित-पूजितं पयःपूरपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनिध्वनित-दिगन्तरः, फल-पटलास्वाद-चपलित-चञ्चु-पतङ्ग-कुलाक्रमणाधिक-विनत-शाख-शाखिसमूह-व्याप्तः सुन्दर-कन्दरः पर्वतखण्ड आसीत्।"[9]

**पूर्ववङ्गप्रकृतिवर्णनम्**— एवं ग्रन्थे प्रकृतेः कमनीयं चित्रं प्राप्यते पूर्ववङ्गस्य वर्णनायाम्। तां वर्णनां पठित्वा पाठकानां कृते एतादृशं भाति यत्ते नदीतटे स्थित्वा सर्वं दृश्यं स्वकीयचक्षुर्भ्यां पश्यन्ति एव। तद्यथा—

"पूर्ववङ्गमपि सम्यगवालुलोकदेष जनः, यत्र प्रान्त-प्ररूढां पद्मावलीं परिमर्दयन्ती पद्मेव द्रवीभूता पयःपूर-प्रवाह-परम्पराभिः पद्मा प्रवहति, यत्र ब्रह्मपुत्र इव शत्रु-सेना-नाशन-कुशलः ब्रह्मदेशं विभजन् ब्रह्मपुत्रो नाम नदो भूभागं क्षालयति, यत्र साम्ल-सुमधुर-रस-पूरितानि फूत्कारोद्धूत-भूति-ज्वलदङ्गार-विजित्वर-वर्णानि जगत्प्रसिद्धानि नारङ्गाण्युद्भवन्ति, यद्देशीयानां जम्बीराणां रसालानां तालानां नारिकेलानां खर्जूराणाञ्च महिमा सर्वदेशरसज्ञानां साम्रेडं कर्णं स्पृशति, यत्र च भयङ्करावर्त-सहस्त्राकुलासु स्रोतस्वतीषु सहोहोकारं क्षेपणीः क्षिपन्तः, अरित्रं चालयन्तः, बडिशं योजयन्तः, कुवेणीस्थ-म्रियमाण-मत्स्य-परीवर्त्तनालोकमालोकमानन्दतः, अदृष्टतटेष्वपि महाप्रवाहेषु स्वल्पया कूष्माण्ड-फक्किकाकारया नौकया, भिन्नाञ्जन-लिप्ता इव, मसीस्नाता इव, साकारा अन्धकारा इव, काला धीवरबाला निर्भयाः क्रीडन्ति।"[10]

**सरोवरवर्णनम्**— प्रकृतिचित्रणे धुरन्धरकविना स्वभावोक्त्यलङ्कारेण कस्यचित् सरोवरस्य वर्णनमतीव मनोहरतया रमणीयतया च चित्रितम्। एतादृशं सरोवरमालोक्य कस्य वा चेतसि उत्सुकता न स्यात्? तद्यथा—

"तत्र वरटाभिरनुगम्यमानानां राजहंसानाम्, पक्षति-कण्डूति-कषण-चञ्चल-चञ्चुपुटानां मल्लिकाक्षाणाम्, लक्ष्मणाकण्ठ-स्पर्श-हर्ष-वर्ष-प्रफुल्लाङ्गरुहाणां सारसानाम्, भ्रमद्भ्रमर-झङ्कार-भार-विद्रावित-निद्राणां कारण्डवानाञ्च तास्ताः शोभाः पश्यन्तौ, तडागतटे एव पम्फुल्यमानानां मकरन्द-तुन्दिलानामिन्दीवराणां समीपत एव मसृण-पाषाण-पट्टिकासु, कुशासनानि मृगचर्मासनानि ऊर्णासनानि च विस्तीर्योपविष्टानाम्, गायत्री-जप-पराधीन-दशन-वसनानाम्, कलित-ललित-तिलकालकानाम्, दर्भाङ्गुलीयकालङ्कृताङ्गुलीनाम्, मूर्तिमतामिव ब्रह्मतेजसाम्, साकाराणामिव तपसाम्, धृतावताराणामिव च ब्रह्मचर्याणां मुनीनां दर्शनं कुर्वन्तौ...."[11] इत्यादि।

**उद्यानवर्णनम्**— प्रकृतेरन्यदपि एकं मनोहरं वर्णनं प्राप्यते ग्रन्थस्य चतुर्थे निःश्वासे कस्याश्चित् वाटिकायाः वर्णने। सरलैः सरसैः शब्दैः वैदर्भीरीतिसुगुम्फितैर्वाक्यविन्यासैश्च प्रकटीकृता तस्याः वाटिकायाः शोभा समुल्लसति।—

"पूर्वस्यामस्ति विशाला पुष्पवाटिका, यस्यामतिमुक्तलताः सौरभेण विष्णुपदमपि मदयन्ति, यूथिकाः सुगन्ध-तरङ्गैर्हरितामपि हृदयं हरन्ति, पाटलि-पटलानि अलि-पटल-रसनाश्चटुलयन्ति, मालतिकाश्च मरन्द-बिन्दु-सन्दोहैर्वसुमतीं वासयन्ति। तस्यां मन्दिर-पूर्वद्वार-सम्मुख एवास्त्येका परमरमणीया ज्योत्स्ना-स्पर्श-प्रकटित-द्विगुणतर-चाकचक्या सोपानत्रयाङ्लकृत-चतुरवरोहा, हंसपक्ष-वलक्ष-च्छवि-विजित्वर-धवल-ग्राव-वेदिका।"[12]

एवं कविना ग्रन्थस्य सप्तमे निःश्वासे एकस्य सुरम्योद्यानस्य वर्णनं विहितमस्ति, यस्य पठनेन पाठकानां हृदयमाप्लुतं भवति। तद्यथा—

"मारुतिमन्दिरात् किञ्चिद्दूरं वाटिकामध्ये सुदृढौ द्वौ स्तम्भौ, तयोरुपरि तिर्य्यग् विन्यस्तो दारु-स्तम्भः, एतन्मध्यत एव विलम्बमानं शृङ्खलायुगद्वयम्,

8 शि.वि. ३/७४

9 शि.वि. १/५

10 शि.वि. २/५० - ५१

11 शि.वि. ३/८४

12 शि.वि. ४/९९

एतत्प्रान्ते च विलम्बमाना प्रतिकोणासक्तैकश्रृङ्खला सुरुचिरा पीठिकेति सुभगेयं दोलिका। सर्वतोऽप्यस्यां शिल्पिशिल्पचमत्कारः। विविधा लताश्च स्तम्भौ वेष्टयित्वा पारस्परिक-सर्वाङ्गीण-संश्लेषेणेव प्रफुल्लास्तथावतिष्ठन्ते; यथा विविध-कुसुममयी भ्रमद्भ्रमर-निकर-झङ्कृता दोलिकेयं दर्शनमात्रेण चक्षुष्मतां मनो हरति। एतद्दोलिकाधिष्ठित-शाद्वलस्य मध्ये मध्ये श्वेत-श्यामादि-पाषाण-निर्मिता रमणीया आस्यन्ध्यः, प्रत्यासन्दि चोभयतः प्रफुल्लसुमाः क्षुपाः, प्रतिक्षुपामाल-वालेष्वपि सकोरका विविधा अङ्कुराः शोभन्ते। वर्तुलक्षेत्रं चैतत्, परितः कुसुमिताः कदम्बकुटाः, तेषां चैकैकमन्तरा महाफला माकन्दद्रुमाः, मध्ये मध्ये च विहितपार्श्वस्थ-पादपाश्लेषा मन्दमन्दमनिलालोला लता लसन्ति।”[13]

**अटवीवर्णनम्**— एवं कविना ग्रन्थस्य तृतीये निःश्वासे कोङ्कणदेशस्य वनस्य वर्णनायां प्रकृतेः कठोररूपस्याऽपि चित्रं संस्थापितम् । तद्यथा--

“श्रूयते सुदूरमस्मात् स्थानात् कोङ्कणदेशः, मध्ये च विकटा अटव्यः, शतशः शैलश्रेणयः, त्वरितधारा धुन्यः, पदे पदे च भयानक-भल्लूकानामम्बूकृत-सङ्कुलानाम्, मुस्ता-मूलोत्खनन-घुर्घुरायित-घोर-घोणानां घोणिनाम्, पङ्क-परीवर्त्तोन्मथित-कासाराणां कासराणाम्, नरमांसं बुभुक्षूणां तरक्षूणाम्, विकट-करटि-कट-विपाटन-पाटव-पूरित-संहननानां सिंहानाम्, नासाग्र-विषाण-शाणन-च्छलविहित-गण्डशैल-खण्डानां खड्गिनाम्, दोदुल्यमान-द्विरेफ-दल-पेपीयमान-दानधारा-धुरन्धराणां सिन्धुराणाम्, कृपा-कृपण-कृपाण-च्छिन्न-दीनाध्वनीन-गल-तल-गलत्पीन-धार-शोणित-बिन्दु-वृन्द-रञ्जित-वारबाण-सारसनोष्णीष-धारणा-कलिताखर्व-गर्व-बर्बराणां लुण्ठक-निकराणाञ्च सर्वथा साक्षात्कारसम्भवः।”[14]

**झञ्झावातवर्णनम्**— प्रकृतेः भयानकरूपविभावेषु झञ्झावातस्यैकं भयङ्करं रूपं ग्रन्थस्य चतुर्थे निःश्वासे कविना एतावता कुशलतया चित्रितम्, येन झञ्झावातस्य वास्तविकं चित्रं पाठकानां समक्षं प्रकटीकरोति। यथा--

“तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायं समय-प्रयुक्तः स्वभाव-वृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः। झञ्झावातोद्धूतै रेणुभिः शीर्णपत्रैः कुसुमपरागैः शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः। इह पर्वतश्रेणीतः पर्वतश्रेणीः, वनाद्वनानि, शिखराच्छिखराणि, प्रपातात्प्रपाताः, अधित्यकातोऽधित्यकाः, उपत्यकात उपत्यकाः, न कोऽपि सरलो मार्गः, नानुद्भेदिनी भूमिः, पन्था अपि च नावलोक्यते। क्षणे क्षणे हयस्य खुराश्चिक्कण-पाषाण-खण्डेषु प्रस्खलन्ति। पदे पदे दोधूयमाना वृक्षशाखाः सम्मुखमाघ्नन्ति, ....परितः सहडहडाशब्दं दोधूयमानानां परस्सहस्रवृक्षाणाम्, वाताघात-सञ्जात-पाषाण-पातानां प्रपातानाम्, महान्धतमसेन ग्रस्यमानानामिव सत्त्वानां क्रन्दनस्य च भयनकेन स्वनेन कवलीकृतमिव गगनतलम्। ....तावदारब्धश्चञ्चचञ्चल-चामीकर-रेखाकाराभिश्चञ्चलाभिरपि स्वचमत्कारः। यावदेकस्यां दिशि नयने विक्षिपन्ती, कर्णौ स्फोटयन्ती, अवलोचकान् कम्पयन्ती, वन्यांस्त्रासयन्ती, गगनं कर्त्तयन्ती, मेघान् सौवर्णकषयेव घ्नती, अन्धकारमग्निनेव दहन्ती, चपला चमत्करोति; तावदन्यस्यामपि ज्वाला-जालेनेव बलाहकानावृणोति, स्फुरणोत्तरं स्फुरणं गर्ज्जनोत्तरं गर्ज्जनमिति परश्शत-शतघ्नी-प्रचारजन्येनेव, कन्दरिकन्दर-प्रतिध्वनिभिश्चतुर्गुणितेन महाशब्देन पर्यपूर्यत सारण्यानी।”[15]

**आषाढवर्णनम्**— ऋतूनां चित्रणेऽपि कविः अम्बिकादत्तव्यासः सुदक्षो वर्तते। प्रकृतिप्रेमिकविना ग्रन्थस्य चतुर्थे निःश्वासे वर्षर्तौः आषाढमासस्य कस्यचित्सायंकालस्य सुशोभनीयं वर्णनं समुपस्थापितम्। यथा—

“मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूर-द्रव-स्नातानामिव वरुण-दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः। कलविङ्काश्चाटकैररुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते। वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति। अथाकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्। क्षणं सूक्ष्मविस्तारा, परतः प्रकटित-शिखरि-शिखर-विडम्बना, अथ दर्शित-दीर्घशुण्ड-मण्डित-दिगन्त-दन्तावल-भयानकाकारा, ततः पारस्परिक-संश्लेष-विहित-महान्धकारा च समस्तं गगनतलं पर्यच्छदीत्।”[16]

एवं ग्रन्थस्य सप्तमे निःश्वासे आषाढमासस्य इतोऽपि एकं सुरम्यं वर्णनं विहितं कविना। यथा—

“...अर्द्धव्यतीतोऽयमाषाढः, कदाचिज्जलद-पटलाच्छन्नम्, कर्हिचिच्च निर्मेघमपि सान्द्रनीलं गगन-तलमालोक्यते। क्वचिन्मयूर-नृत्यानि, क्वचिच्चातक-विरावाः, क्वचिज्जलप्रवाहाः, क्वचिद्धारासाराः, क्वचिदेन्द्रगोप-संसर्गाधिक-मनोहराणि शाद्वलानि प्रतिभान्ति। पञ्चषाणि दिनानि चण्डकरकरैः संसारं सन्ताप्य अद्य कैश्चिन्मेघखण्डैः किमपि व्याप्तं नभः इत्युष्णुता किञ्चित् क्रशिमानमालम्बते।”[17]

---

[13] शि.वि. ७/१६४

[14] शि.वि. ३/७९-८०

[15] शि.वि. ४/९०-९१

[16] शि.वि. ४/८९

[17] शि.वि. ७/१६४

**शरदृतुवर्णनम्**— एवं ऋतुचक्रवर्णनक्रमे कविना ग्रन्थस्य नवमे निःश्वासे शरदृतोः अतीव मनोहरतया वर्णनं समुपस्थापितम्, यथा—

"ऋतुरेष शरत्। साम्प्रतं पुण्यनगरप्रान्तेऽकालेऽपि वसन्त इव पुंस्कोकिलाः काकली-कल-कलैर्दिगन्तं बधिरयन्ति। मिलित-मलयानिल-लोला लवङ्गलता दोलन्ति। मधु-गन्धान्ध-मधुव्रत-व्रात-विधुता-माकन्द-मञ्जर्यो माञ्जुल्यं वमन्ति। नितान्त-विरह-क्लान्त-परमश्रान्त-शून्यस्वान्त-कान्ताजन-ज्वालाजटाल-दाव-ज्वलन-जाज्वल्यमानाऽङ्गारक-कदम्बमिव पाटल-पटलमुल्लसति। पुष्पपरागैः पीत-मकरन्द-बिन्दु-सन्दोहैरार्दः प्रफुल्ल-लतालिङ्गनैः शीतः कुञ्जसंश्लेषैश्च धीरः समीरः प्रवहति स्म।"[18]

**शीततुर्वर्णनम्**— एवं ऋतूनां क्रमपर्याये शीततोंरपि सुरम्यं वर्णनं समुपस्थापितं कविना ग्रन्थस्य दशमे निःश्वासे, यथा—

"समयोऽयं महामहिम-हिमाच्छन्न-शिशिरस्य। ऋतुनैतेन दिनानां परिणाहः, तमीनां तनुता, पयोजनानां प्रसन्नता, सलिलानां सुखावगाह्यता च लुण्ठिता। भगवान् भास्करो दक्षिणस्यां निर्वासितः। गगनतलं च प्रायिक-प्रालेय-पातैर्धूम-धूसरितमिव विहितम्। साम्प्रतं तैल-ताप-तूलिका-तरुणी-ताम्बूलादिष्वेव कृतादरा जनाः। जगत्प्राणो जगति प्राणिनो जडीकुर्वन् जवेन वहति। आखण्डल-दिक्कुण्डलता-मात्रमुपेयुषः, शुकतुण्डच्छवेः मार्त्तण्डमण्डलस्य, अचण्डानां मरीचीनां कोमलमुत्तापं सिषेवयिषूणां शाद्वलेन पथा प्रयातानां वन्यजन्तूनां पादक्षेपविहिता नैशीथ-मिहिका-प्रचयभङ्गा एव, आखेटक्रीडाकौतुकिनां पन्थानमुदिशन्ति।"[19]

अनेन प्रकारेण श्रीमता अम्बिकादत्तव्यासेन विरचिते 'शिवराजविजयः' इत्युपन्यासाख्ये गद्यकाव्ये सरल-सरसभाव-प्रसूनैः सुपुष्टार्थबोधकैः पदसमन्वितैर्वाक्यैः समासतः प्रकृतिचित्रणमालोचितम्।

## सहायकग्रन्थसूची


१. शिवराजविजयः, शर्मा, श्रीकेदारनाथः (सम्पादकः), व्यास-पुस्तकालयः, मानमन्दिरम्, काशी १९३८

२. शिवराजविजयः, पाण्डेयशास्त्री, श्रीरामजी (व्याख्याकारः), व्यास-पुस्तकालयः मानमन्दिरम्, काशी, प्रथमो विरामः १९९१, द्वितीयो विरामः १९७४, तृतीयो विरामः १९६९

३. शिवराजविजयः (प्रथमो विरामः), मिश्रः, डॉ. देवनारायणः (व्याख्याकारः), साहित्य-भण्डारः, सुभाष बाजारः, मेरठः २०१६

४. शिवराजविजयमहाकाव्यम् (प्रथमो विरामः), चौबे, डॉ. विजयशङ्करः (व्याख्याकारः), मोतिलाल बनारसीदासः, वाराणसी २०१६

५. शिवराजविजयः, मिश्रः, डॉ. रमाशङ्करः(व्याख्याकारः), चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २०१७


[18] शि.वि. ९/२३९

[19] शि.वि. १०/३११